ज्ञेयानि । [1]प्सापयन्-न्ती-ती, [इदमेषां] [2]प्सातम्, इत्यस्माद् धातोः भवन्तीति विशेषः । [A]प्सातिः, [3]प्रणिप्साता, [4]द्रप्सः ।

(1087) "फक्क नीचैर्गतौ" (I-भ्वादिः-116. सक. सेट्. पर.)

'नीचैर्गतिः=मन्दगमनम्, असद्व्यवहारो वा।' इति क्षीरस्वामी । 'अधोगमनम्।' इति केशवस्वामी । इति मा. धा. वृत्तिः ।

फक्ककः-क्किका, फक्ककः-क्किका, पिफक्किषकः-षिका, पाफक्ककः-क्किका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककक्कतिवत् (139) ज्ञेयानि । फक्कन्-न्ती, इति शतरि रूपम् ।

(1088) "फण गतौ" (I-भ्वादिः-821. सक. सेट्. पर.) घटादिः ।

फाणकः-णिका, [5]फणकः-फाणकः-णिका, पिफणिषकः-षिका, पंफणकः-पम्फणकः-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककणतिवत् (157)

---

1. 'निगरणचलनार्थेभ्यः—' (1-3-87) इति ण्यन्तात् कर्तृगामिन्यपि क्रियाफले परस्मैपदमेव । तेन शानच् न ।
2. 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (3-4-76) इति अधिकरणे क्तप्रत्ययः । प्रत्यवसानार्थाः=भक्षणार्थकाः धातवः ।
3. 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्साति—' (8-4-17) इत्यादिना उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वम् ।
4. द्रवणेन प्सानीयो द्रप्सः । 'घञर्थे कविधानम्—' (वा. 3-3-58) इति कप्रत्ययः । 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः । पृषोदरादित्वात् (6-3-109) द्रवणशब्दस्य द्रादेशः ।
5. घटादित्वेन मित्त्वात् णौ, 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वे रूपमेवम् । 'फणेः पूर्वे घटादयः ।' इति मैत्रेय-क्षीरस्वाम्युपात्तवचनानुसारेण फण-धातोर्घटादित्वं नेति ज्ञायते । तदानीं मित्त्वाभावात् फाणकः-णिका, इत्यादीन्येव रूपाणि । किञ्च, धातूनामनेकार्थकत्वात्, गत्यर्थकस्य फणधातोरेव घटादिषु पाठ इति ज्ञायते; यतः 'अन्यत्र फाणयति=घटं निःस्नेहयतीत्यर्थः ।' इति क्षीरस्वामी बभाण । '......फण-ण् निःस्नेहने—।' इति कविकल्पद्रुम-(श्लो 176) वाक्यमप्यत्र निःस्नेहनार्थेऽस्य धातोः प्रयोगेऽनुकूलम् ।

A. 'स्नान्त्यस्तदा श्रामुपाश्य चान्नं निद्रां गताः प्सातिपरास्तथाऽन्याः ।' धा. का. 2.49.